॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## देवी अपराध क्षमापन

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# देवी अपराध क्षमापन

## स्तोत्रम्

न मन्त्रं(न्) नो यन्त्रं(न्), तदपि च न जाने स्तुतिमहो
न चाह्वानं(न्) ध्यानं(न्), तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते, तदपि च न जाने विलपनं
परं(ञ्) जाने मातस्-त्वदनुसरणं(ङ्) क्लेशहरणम् ॥1॥

विधेरज्ञानेन, द्रविणविरहेणालसतया
विधेयाशक्यत्वात्-तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं(ञ्), जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत, क्वचिदपि कुमाता न भवति ॥2॥

पृथिव्यां पुत्रास्ते, जननि बहवः(स्) सन्ति सरलाः
परं(न्) तेषां मध्ये, विरलतरलोऽहं(न्) तव सुतः ।
मदीयोऽयं(न्) त्यागः(स्), समुचितमिदं(न्) नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥3॥

जगन्मातर्मातस्-तव चरणसेवा न रचिता
न वा दत्तं(न्) देवि, द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं, मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत, क्वचिदपि कुमाता न भवति ॥4॥

परित्यक्ता देवा, विविधविधसेवाकुलतया
मया पञ्चाशीते-रधिकमपनीते तु वयसि ।
इदानीं(ञ्) चेन्मातस्-तव यदि कृपा नापि भविता
निरालम्बो लम्बो-दरजननि कं यामि शरणम् ॥5॥

श्वपाको जल्पाको, भवति मधुपाकोपमगिरा
निरातङ्को रङ्को, विहरति चिरं(ङ्) कोटिकनकैः ।
तवापर्णे कर्णे, विशति मनुवर्णे फलमिदं(ञ्)
जनः(ख्) को जानीते, जननि जपनीयं(ञ्) जपविधौ ॥6॥

चिताभस्मालेपो, गरलमशनं(न्) दिक्पटधरो
जटाधारी कण्ठे, भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो, भजति जगदीशैकपदवीं
भवानि त्वत्पाणि-ग्रहणपरिपाटीफलमिदम् ॥7॥

न मोक्षस्याकाङ्क्षा,भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा, शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे, जननि जननं यातु मम वै
मृडानी रुद्राणी, शिव शिव भवानीति जपतः ॥8॥

नाराधितासि विधिना विविधोपचारैः,
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे,
धत्से कृपामुचितमम्ब परं(न्) तवैव ॥9॥

आपत्सु मग्नः(स्) स्मरणं(न्) त्वदीयं(ङ्)
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः(ह्),
क्षुधातृषार्ता जननीं स्मरन्ति ॥10॥

जगदम्ब विचित्रमत्र किं,
परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परापरं(न्),
न हि माता समुपेक्षते सुतम् ॥11॥

मत्समः(फ्) पातकी नास्ति, पापघ्नी त्वत्समा न हि ।
एवं(ञ्) ज्ञात्वा महादेवि, यथायोग्यं(न्) तथा कुरु ॥12॥